राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला -३३५

ISSN: 2231-0452

# महस्विनी

## षाण्मासिकी शोधपत्रिका

कुसुमम् : द्वादशम् जुलाई - डिसम्बर, २०१८ सम्पुटम् : २

प्रधानसम्पादकः

आचार्यः वि.मुरलीधरशर्मा

कुलपतिः

सम्पादकः

आचार्यः कोराड सूर्यनारायणः

राष्ट्रियसंस्कृतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य १९५६ अधिनियमस्य

तृतीयधारया अनुमोदितः विश्वविद्यालयः)

तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः

K.L. Srivenkatanathan

ISSN: 2231-0452

# न्यायनये अपवर्गस्वरूपविचार:

*डा. का. ई. श्रीवेङ्कटनाथ:*

*(सहायकाचार्य:, न्यायविभाग:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:)*

अथ पुरुषार्थचतुष्टये मोक्षस्यैव प्रधानत्वात् संसारदु:खनिवृत्तिरूपत्वात्, संसारदु:खानां च असह्यत्वात् न्यायदर्शनानुसारेण मोक्षप्रयोजकीभूतज्ञानसिध्यर्थं तादृशाज्ञानविज्ञेयपदार्थ-निकरनिरूपणार्थं च न्यायाचार्य: श्री गौतम: सूत्रबृन्दं निरमिमीत। तत्त्वरत्नपरीक्षायां प्रवृत्ता भारतीयचिन्तनसरणि: आस्तिक-नास्तिकभेदेन भिद्यते। तत्र आस्तिकदर्शनेषु अन्यतमं दर्शनम् इदं न्यायदर्शनम्। यद्यपि साक्षात् वैदिकवाक्यानां प्रामाण्यं प्रतिष्ठापयितुं पूर्वोत्तरमीमांसादर्शने प्रवृत्ते तथापि वैदिकलौकिकवाक्यानां सप्रमाणं प्रामाण्यं निरूपितं न्यायदर्शने। अत एव विद्यते चतुर्दशविद्यास्थानेष्वपि उच्चस्थानं न्यायदर्शनस्य। श्रूयते च याज्ञवल्क्यस्मृतौ -

**पुराणन्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिता:।**
**वेदा: स्थानानि विद्यानां धर्मस्य च चतुर्दश**[1] ।। इति।

शोधलेखेऽस्मिन् मया न्यायभाष्यग्रन्थानुसारेण अपवर्गस्वरूपविषये निरूप्यते।

**न्यायभाष्यम् -**

त्रिविधा च अस्य शास्त्रस्य प्रवृत्ति: - उद्देशो, लक्षणम्, परीक्षा चेति। आदौ प्रतिपिपादयिषितानां पदार्थानां क्रमेण नामभि: निर्देश: क्रियमाण: उद्देश: उच्यते। उद्देशग्रन्थे क्रमविन्यासे ग्रन्थकर्तु: इच्छैव नियामिका। पश्चात् उद्दिष्टपदार्थानां उद्देशक्रमानुसारेण लक्षणम्। तत: लक्षितानां परीक्षणं क्रियते। अत एव **"प्रमाणै: अर्थपरीक्षणं न्याय:"**[2] इति वात्स्यायनाचार्य: अवदत् ।

अत्र च **"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम:"**[3] इति प्रथमं सूत्रम्। सूत्रेऽस्मिन् षोडशपदार्था: विभक्ता:। **"प्रमेयत्वं अभिधेयत्वं च**